पितॄणां वल्लभा ह्येताः श्राद्धे कोटिगुणा मताः ।
जम्बूमार्गं महापुण्यं यत्र मार्गो हि लक्ष्यते ॥
अद्यापि पितृतीर्थं तत् सर्व्वकामफलप्रदम् ।
नीलकुण्डमिति ख्यातं पितृतीर्थं द्विजोत्तमाः ! ॥
तथा रुद्रसरः पुण्यं सरो मानसमेव च ।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥
पूर्व्वमित्रपदन्तद्वद्वैद्यनाथं महाफलम् ।
क्षिप्रा नदी महाकालस्तथाकालञ्जरं शुभम् ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च ॥
गयापिण्डप्रदानेन समान्याहुर्महर्षयः ।
एतानि पितृतीर्थानि सर्व्वपापहराणि च ॥
स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम् ।
ओङ्कारं पितृतीर्थञ्च कावेरी कपिलोदकम् ॥
सम्भेदञ्चण्डवेगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥
शुक्रतीर्थञ्च विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्व्वव्याधिहरं पुण्यं शतकोटिफलाधिकम् ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ ।
कायावरोहणं नाम तथा चर्म्मण्वती नदी ॥
गोमती वरुणा तद्वत्तीर्थमौशनसं परम् ।
भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरमतः परम् ।
तथा पापहरं नाम पुण्याथ तपती नदी ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधिः पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाशालं तथैव च ।
महारुद्रं महालिङ्गं दशार्णा च नदी शुभा ॥
शतरुद्रा शताह्वा च तथा विश्वपदं परम् ।
अङ्गारवाहिका तद्वन्नदी तौ शोणघर्घरौ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः ॥
श्राद्धमेतेषु यद्दत्तन्तदनन्तफलं स्मृतम् ।
द्रोणी वाटनदी धारासरित् क्षीरनदी तथा ॥
गोकर्णं गजकर्णञ्च तथा च पुरुषोत्तमः ।
द्वारका कृष्णतीर्थञ्च तथार्बुदसरस्वती ॥
नदी मणिमती नाम तथा च गिरिकर्णिका ।
धूतपापं तथा तीर्थं समुद्रो दक्षिणस्तथा ॥
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघकरं नाम स्वयमेव जनार्द्दनः ॥
यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थितः ।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा सामलनाथञ्च महाशालनदी तथा ।
चक्रवाकं चर्म्मकोटं तथा जन्मेश्वरं महत् ॥
अर्ज्जुनं त्रिपुरं चैव सिद्धेश्वरमतः परम् ।
श्रीशैलं शाङ्करं तीर्थं नारसिंहमतःपरम् ॥
महेन्द्रञ्च तथा पुण्यमथ श्रीरङ्गसंज्ञितम् ।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
दर्शनादपि चैतानि सद्यः पापहराणि वै ।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ॥
भीमेश्वरं कृष्णवेणा कावेरी कुड्मला नदी ।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम् ॥
तीर्थं त्रैयम्बकं नाम सर्व्वतीर्थनमस्कृतम् ।
यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः ॥
श्राद्धमेतेषु सर्व्वेषु कोटिकोटिगुणं भवेत् ।
स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः ! ॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम् ।
तथा मत्स्यनदी पुण्या शिवधारं तथैव च ॥
भवतीर्थञ्च विख्यातं पम्पातीर्थञ्च शाश्वतम् ।
पुण्यं रामेश्वरं तद्वदेलापुरमलं परम् ॥
अङ्गभूतञ्च विख्यातमानन्दकमलं शुभम् ।
आम्रातकेश्वरं तद्वदेकाम्भकमतः परम् ॥
गोवर्द्धनं हरिश्चन्द्रं क्रपुचन्द्रं पृथूदकम् ।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गमः ।
इन्द्रकीलं महानादन्तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्व्वदेवानां सान्निध्यं दृश्यते यतः ॥
दानमेतेषु सर्व्वेषु दत्तं कोटिशताधिकम् ।
बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्व्वतिका शुभा ।
श्राद्धमेतेषु सर्व्वेषु दत्तं कोटिशतोत्तरम् ॥
तथैव पितृतीर्थन्तु यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सव्यान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥
तत्तीर्थं हव्यकव्यानामप्सरोयुगसंज्ञितम् ।
श्राद्धाग्निकार्य्यदानेषु तथा कोटिशताधिकम् ॥
तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम् ।
सेन्द्रफेना नदी पुण्या यत्रेन्द्रः पतितः पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत् ॥
तीर्थन्तु पुष्करं नाम शालग्रामं तथैव च ।
सोमपानञ्च विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वैदर्भा चाथ वेरा च पयोष्णी प्राङ्मुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरो गिरिः ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम् ।
कुब्जाम्रन्तु तथा तीर्थं उर्व्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अट्टहासं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वशिष्ठं तीर्थन्तु हारितं तु ततः परम् ॥
ब्रह्मावर्त्तं कुशावर्त्तं हयतीर्थं तथैव च ।
पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च ॥
घण्टेश्वरं बिल्वकञ्च नीलपर्व्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
अश्वतीर्थञ्च विख्यातमनन्तं श्राद्धदानयोः ।
तीर्थं वेदशिरो नाम तथैवौघवती नदी ॥
तीर्थं वसुपदं नाम छागलाण्डं तथैव च ।
एतेषु श्राद्धदातारः प्रयान्ति परमं पदम् ॥
तथा च वदरीतीर्थं गणतीर्थं तथैव च ।
जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव शारदातीर्थं भद्रकालेश्वरं तथा ॥
वैकुण्ठतीर्थञ्च परं भीमेश्वरमथापि वा ।
एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम् ॥
तीर्थं मातृगृहं नाम करवीरपुरं तथा ।
कुशेश्वरञ्च विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थञ्च कर्दमालं तथैव च ।
दण्डिपुण्यकरं तद्वत् पुण्डरीकपुरं तथा ॥
सप्त गोदावरीतीर्थं सर्व्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभिः ॥
एष तूद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किमु मानुषः ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रहः ।
वर्णाश्रमाणां गेहेऽपि तीर्थन्तु समुदाहृतम् ॥
एतत्तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थं श्राद्धं समाचरेत् ॥”*॥)

तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इत्यमरः ॥
“अन्तराङ्गुष्ठदेशिन्योः पितृणां तीर्थमुत्तमम् ॥”
इति कौर्म्मे उपविभागे ११ अध्यायः ॥

पितृदानं, क्ली, (पितरि पित्रे वा दानम् ।) पित्राद्युद्देशेनान्नजलादिदानम् । पितृपदं म्तोपलक्षणं तेन मात्रादेरपि ग्रहणम् । तत्पर्य्यायः । निवापः २ । इत्यमरः । २।७।३१ ॥ निवपनम् ३ पितृदानकम् ४ । इति शब्दरत्नावली ॥

पितृदानकं, क्ली, (पितृदान + स्वार्थे कन् ।) पित्रुद्देश्यकदानम् । इति शब्दरत्नावली ॥

पितृपक्षः, पुं, (पितृप्रियः पक्षः ।) गौणाश्विनकृष्णपक्षः । स तु प्रेतपक्षः । तत्र श्राद्धफलं यथा, हेमाद्रिमाधवसंग्रहयोर्नागरखण्डम् ।
“आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवम् ॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥”
इति मलमासतत्त्वम् ॥

पितृपतिः, पुं, (पितॄणां पतिः ।) यमः । इत्यमरः ।१।१।६१ ॥ (यथा, मार्कण्डेये ।१०४।३७
“त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपतिः समीरः ।
सोमोऽग्निर्गगनमहीधरोऽब्धिसंघः
किं स्तव्यं तव सकलात्मरूपधाम्नः ॥”)

पितृपिता, [ऋ] पुं, (पितुः पिता ।) पितामहः । इत्यमरः । २ । ६ । ३३ ॥

पितृप्रसूः, स्त्री, (पितॄणां प्रसूर्मातेव । पितृकार्य्ये सन्ध्याव्यापिन्यास्तिथेर्ग्राह्यत्वादस्याः प्रसूतुल्यपालकतया तथात्वम् ।) सन्ध्या । इत्यमरः ।१।४।३॥ (यथा, आर्य्यासप्तशत्याम् । ५०१ ।
“रजनीमियमुपनेतुं पितृप्रसूः प्रथममुपतस्थे ।